# श्रीमद् भागवत रसिक कुटुंब

## क्षमा प्रार्थना

ॐ अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ 1॥

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां(ञ्) चैव न जानामि क्षम्यतां परमेश्वरि ॥ 2॥

मन्त्रहीनं(ङ्) क्रियाहीनं भक्तिहीनं सुरेश्वरि।
यत्पूजितं मया देवि परिपूर्णं(न्) तदस्तु मे ॥ 3॥

अपराधशतं(ङ्) कृत्वा जगदम्बेति चोच्चरेत् ।
यां(ङ्) गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥ 4॥

सापराधोऽस्मि शरणं प्राप्तस्त्वां(ञ्) जगदम्बिके ।
इदानीमनुकम्प्योऽहं(यँ) यथेच्छसि तथा कुरु ॥ 5॥

अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं(ङ्) कृतम्।
तत्सर्वं(ङ्) क्षम्यतां(न्) देवि प्रसीद परमेश्वरि ॥ 6॥

कामेश्वरि जगन्मातः(स्) सच्चिदानंदविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥ 7॥

गुह्यातिगुह्यगोप्त्री त्वं(ङ्) गृहाणास्मत्कृतं(ञ्) जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥ 8॥